© 2017 IJSRST | Volume 3 | Issue 1 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
International Journal of Scientific Research in Science and Technology

वास्तुविज्ञानस्य महत्त्वम्

डॉ.चन्द्रमौली रैणा

सहायकाचार्यः,ज्योतिषविभागः

राष्ट्रीयसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

श्रीरणवीरपरिसरः ,कोट-भलवालः ,जम्मूः

ज्योतिःशास्त्रमिदं पुण्यं प्राहुर्नयविदो बुधाः।
स्वतः प्रामाण्यमस्यास्ति सत्यं प्रत्यक्षतो यतः ।।

भूमिका - सिन्धुसभ्यताचित्राणि प्रायः सर्वानपि आश्चर्यचकितान् कुर्वन्ति एव । तत्रत्या वास्तुविद्या अतिप्राचीना अत्युत्कृष्टा च । कर्णाटके बेलूरे विद्यमानः भूमिस्पर्शरहितः स्तम्भः, कोणार्कक्षेत्रस्य सूर्यदेवालयः शृङ्गेरिस्तम्भाः, अनन्तपुरीस्थाः सप्तस्वरप्रभवाः मण्डपाधाराः स्तम्भाः, अजन्ता-एल्लोरागुहाः देहलीस्थः विष्णुस्तम्भः इत्यादयः अनेके अंशाः भारतीयवास्तुविद्यायाः गरिमाणं प्रमाणीकुर्वन्ति । मयमतं, मयसारः, मनुष्यालयचन्द्रिका, सुप्रभेदागमः, वास्तुरत्नावली, कामिकागमः, बृहद्वास्तुमाला इत्यदिषु अनेकेषु ग्रन्थेषु वास्तुशास्त्रं निरुपितम् अस्ति॥ सहस्रसहस्रवर्षेभ्यः प्राक्तनाः देवालयाः राजमन्दिराणि गृहाणि चास्मिन् भारते देशे बहोः कालादविनष्टा एव विलसन्तीत्यानुभविकम् । न चैतद् यादृच्छिकं भवतुमर्हति । अत्र वास्तुतत्त्वशास्त्रानुसारेण निबध्दानि गृहाणि देवालयाश्च भूकम्पादावप्रणष्टाः वास्तुविज्ञानस्य सार्वकालिकतामावेदयन्ति । वास्तुशास्त्रमवश्याध्येयं, विज्ञेयं च सर्वैरपि। वास्तुशास्त्रग्रन्थाः सन्त्यनेकेऽस्मिन् देशे । अत्र तु प्राधान्येन सनत्कुमारप्रणीतगृहवास्तुग्रन्थमवलम्ब्य विशयवैमर्शः कृतः।

चैत्रमासे गृहनिर्माणे द्रव्यनाशः भयं च । वैशाखे शुभम् । ज्येष्ठे मृतिः । आषाढे पशुनाशः । श्रावणे पुत्रर्ध्दिः । भाद्रपदे पुत्रादीनां रोगभीः । आश्वयुजे कलहः । कार्तिके द्रव्यलाभः । मार्गशीर्षे भयम् । पुष्ये अग्निदाहः । माघे सन्ततिवृध्दिः । फाल्गुने रत्नलाभः । तदुक्तम् –

गृहसंस्थापनं चैत्रे धनहानिर्महाभयम् ।
वैशाखे शुभदं विद्यात् ज्येष्ठे तु मरणं ध्रुवम् ॥
आषाढे गोकुलं हन्ति श्रावणे पुत्रवर्धनम् ।
प्रजारोगं भाद्रपदे कलहो अश्वयुजे तथा ॥

कार्तिके धनलाभः स्यात् मार्गशीर्षे महाभयम्
। पुष्ये चाग्निभयं विद्यात् माघे तु बहुपुत्रवान् ।
फाल्गुने रत्नलाभः स्यात् मासानां च
शुभाशुभम् [१] **॥**

न यस्मिन् कस्मिन् वासरे गृहनिर्माणं कर्तव्यम्, अपि तु प्रशस्त एव । तथा हि- भानुवासरे गृहारम्भे अह्निदाहः शुक्लपक्षे सोमवासरे गृहारम्भे वृध्दिः । कृष्णपक्षे सोमवासरे कलहः नाशश्च । कुजवासरे तदंशे, तल्लग्ने स्तम्भप्रतिष्ठादिकरणे गृहदाहः यजमानस्य मृतिश्च । बुधवासरे ऐश्वर्यवृध्दिः । गुरुवासरे सवार्थसिध्दिः । शुक्रे बहुसुखम् । मन्दवासरे चोरभयम् । तस्मात् विहितदिने विहितवासर एव गृहारम्भः कार्यः । तदुक्तम् –

भानुवारे कृतं वेश्म वह्निना दह्यते चिरात्
चान्द्रे च वर्धते शुक्ले क्षीयते
कृष्णपक्षके ॥ भौमवासरे तदंशे वा
तल्लग्ने सप्तमेऽपि वा ।दह्यते (तद् गृहं)
शून्यं कर्तुर्मरणमेव च ॥बुधवारे धनैश्वर्यं
सुखपुत्रसमन्वितम् भृत्यवाहनधान्यानि
धनान्याङ्गिरसे दिने ॥ भृगुवारे चिरं
तिष्ठेत् कर्ता च सुखसम्पदा । चिरं
तिष्ठेन्मन्दवारे तस्कराणां भयावहः ॥ [२]

मृगशीर्षक- हस्ता –रेवती-चित्ता अनुराधा –उत्तराषाढा – उत्तराभाद्रा –श्रवण पुनर्वसु –शतभिषा- धनिष्ठा –अश्विनीनक्षत्राणि गृहारम्भाय सुखदानि च । शैववैष्णवतन्त्रागमग्रन्थेषु वास्तुपुरुषकथा भिन्नैव श्रूयते । वैष्णवतन्त्ररीत्या वास्तुर्वराहरुपिणो हरेः सुतः । देवतैः भूमौ पातितः । चतुरस्राकृतिः स्थितश्च । तदुपरि ब्रह्मादयः देवाः सन्निहिताः । तान् यथाविधि सम्पूज्य गृहादि निर्मेयम् । तदुक्तम् –

पूजयेद् वास्तुपुरुषस्योपरिस्थांस्तु सर्वदा ।
देवान् ब्रह्मादिकान् वास्तुर्वराहस्य हरेः सुतः ।
पातितो देवतैर्भूमौ चतुरस्राकृतिः स्थितः ॥[३]

शैवग्रन्थेष्वन्यैव कथा श्रूयते – अन्धकासुरसंहारे क्रुध्दस्य शूलिनः स्वेदबिन्दुः भूमौ पतितः । स्वेदबिन्दुरेव द्यावापृथिवीमभिव्याप्य वास्तुपुरुषरुपेणोदतिष्ठत् सर्वभयङ्करः । ततश्च देवतैर्भूमौ पातितः । मन्दिरादिनिर्माणकाले तत्पूजनाय वरश्च देवैः प्रदत्तः । तदुक्तम्

सङ्ग्रामेऽन्धकरुद्रयोश्च पतितः स्वेदो महेशात्
क्षितौ तस्माद् भूटमभूच्च भीतिजननं
द्यावापृथिव्योर्महत् । तद्देवैः सहसा निगृह्य
भूमावधोवक्त्रकं देवानां वचनाच्च
वास्तुपुरुषस्तेनैव पूज्यो बुधैः[४] ॥ इति

भूपरीक्षां कृत्वा सार्धपुंमानतस्त्वधः भुवं संशोध्य लोष्टाश्मास्थिविवर्जिते देशे गृहं निर्मेयम् । पूर्वस्यां दिशि स्नानगृहं कार्यम् । आग्नेये पाकशाला विधेया । दक्षिणस्यां दिशि स्वापशाला । नैऋत्यां दिशि आयुधशाला । पश्चिमे भोजनशाला । वायव्ये पशुशाला । उत्तरस्यां दिशि द्रव्यनिक्षेपगृहं कार्यम् । ईशान्ये देवमन्दिरम् । तदुक्तम् –

स्नानागारं दिशि प्राच्याम् आग्नेय्यां पचनालयम् ।

दक्षिणे शयनागारं नैऋत्यां शस्त्रमन्दिरम् ॥

पश्चिमे भोजनागारं वायव्ये पशुमन्दिरम् ।

भण्डारं चोत्तरस्यां तु ईशान्यां देवमन्दिरम् ॥[५]

उक्तं चान्यत्र –

स्नाताम्मि पाकशयनास्त्रभुजेश्च

धान्यभाण्डारदैवतगृहाणि च पूर्वतः स्युः । तन्मध्यतोऽथ
मथनाज्यपुरीष-

विद्याभ्यासाख्यरोदनरतौषधसर्वधाम ॥ [६]

कूपादिनिर्माणं उत्तरस्यां पूर्वपश्चिमदिशि च प्रशस्तम् । द्वारहीनो जलाशयः कूपशब्देन व्यपदिश्यते । द्वारेणैकेन भूषितः वापिसंज्ञकः । अनेकद्वारविशिष्टा पुष्कलजलाधारा पुष्करिणीत्युच्यते । तदुक्तम् –

द्वारहीनौ भवेत्कूपःद्वारेणैकैन
वापिका । नैकद्वारा पुष्करिणी
दीर्घाकारा तु दीर्घिका । कुल्या
विधूततोयाश्च तटाकाः
परिकीर्तिताः ॥

कूपादिनिर्माणम् आग्नेय नैऋत्य-वायव्यदिशि परित्याज्यम् । उत्तर –पूर्व –पश्चिमदिशि शस्तम् । तदुक्तं वराहमिहिरेण

एवं अन्यत्र च –

आग्नेये यदि कोणे ग्रामस्य गृहस्य वा भवति कूपः ।

नित्यं करोति दाहं जलमपि तत्रैव चञ्चलप्रायम् ।

नैऋते कोणे बालक्षयं च वनिताक्षयं वायव्ये ।

दिक्त्रयमेतत्त्यक्त्वा शेषास्तु शुभावहाः प्रोक्ताः ॥ इति

स्नानाग्निस्वपिवभोजनपशुद्रव्यामरोकस्थितिं

पूर्वादौ जलमीशितुर्दिशि परं वायोरपाङ्मूत्रकम् । आल्पे
शक्तिभुवो यथारुचि परे गेहस्य दक्षे
घटद्दाम्बूलूखलचुल्लिकापितृपदप्रक्षालनान्यूचिरे

पाद्टिप्पणी –

1. सनत्कुमारवास्तुशास्त्रम्. पृष्ठसंख्या- 7
2. ↑ स.वा.शा.p.7
3. ↑ तं.सा.सं III.67.p.77
4. ↑ वा.र.p.38
5. ↑ स.वा.शा.p.69
6. ↑ मु.चि. १२.२०

सन्दर्भग्रन्थसूची-

1. सूर्यसिद्धान्तः कपिलेश्वर शास्त्री, चौखम्भा संस्कृतसंस्थान वाराणसी ।
2. मुहूर्तचिन्तामणि श्रीरामदैवज्ञविरचितं, चौखम्बा विद्याभवन वाराणसी ।
3. सिद्धान्तशिरोमणिः, श्रीमान्भास्कराचार्यः चौखम्बा संस्कृत संस्थान, वाराणसी ।
4. नारदसंहिता – महर्षिनारदविरचितं , मोती लाल वाराणसी , नई- दिल्ली ।
5. बृहज्जातकम् –दैवज्ञवहारमिहिर विरचितः, चौखम्बा संस्कृत संस्थान, वाराणसी ।